**CLASS : 12th (Sr. Secondary)** **Code No. 3605**

**Series : SS-M/2018**

*रोल नं०* | | | | | | | | | | |

***SET : D***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh/Re-appear Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

---

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

---

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

### खण्डः 'क'

### (अपठित-अवबोधनम्)

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

'रघुवंशम्' कालिदासप्रणीतम् एकं महाकाव्यम्। एतस्य एकोनविंशतिसर्गेषु सूर्यवंशिनां नृपाणां कीर्त्तिगानम् अस्ति। अस्य महाकाव्यस्य कथानकं रामायणे पुराणेषु च आधारितम्। प्रथमे सर्गे सूर्यवंशिराज्ञां वर्णनानन्तरं दिलीपस्य चरित्रस्य, तस्य अपत्यहीनत्वेन वसिष्ठस्य आश्रमे गमनस्य च वर्णनं वर्तते। द्वितीये सर्गे दिलीपस्य नन्दिन्याः सेवया पुत्रप्राप्तिवरदानस्य च चित्रणम् अस्ति। तृतीये सर्गे रघुजन्मनः वर्णनम्। चतुर्थे सर्गे रघोः दिग्विजयनिरूपणम्। अतः परेषु सर्गेषु रघोः सर्वस्वदानम्, अजजन्म, अजस्य विजयः, राज्यशासनम्, अज-विलापः, दशरथजन्म, रामकथा-आदिकानि घटनानि वर्णितानि सन्ति। सम्भाव्यते कवेः देहान्तरस्य हेतोः काव्यस्य अन्तः भवति यतो हि कथायाः विधिवत् समाप्तिर्न जाता अस्ति। एतत् कालिदासस्य द्वितीयं महाकाव्यम् अस्ति। संस्कृतकाव्यशास्त्र-परम्परया इदं श्रेष्ठं महाकाव्यं स्वीकृतम्।

*प्रश्नाः* – $2 \times 5 = 10$

(क) केषां कीर्तिगानम् अस्ति ?

(ख) दिलीपः केन कारणेन वसिष्ठस्य आश्रमे अगच्छत् ?

(ग) 'रघुवंशम्' केन प्रणीतं महाकाव्यम् ?

(घ) काव्यशास्त्रपरम्परया इदं कीदृशं महाकाव्यं स्वीकृतम् ?

(ङ) 'गमनम्' अत्र कः प्रत्ययः ?

## खण्डः 'ख'

## (रचनात्मक–कार्यम्)

**2.** *विषयमेकमधिकृत्य* लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) समयस्य सदुपयोगः,

(ख) मम प्रियं पुस्तकम् (गीता),

(ग) प्रातःकालीन भ्रमणम्।

## खण्डः 'ग'

## (पठित–अवबोधनम्)

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) अपरे तु स्वार्थनिष्पादनपरैः दोषानपि गुणपक्षमध्यारोपयद्भिः प्रतारणकुशलैर्धूर्त्तैः प्रतार्यमाणा वित्तमदमत्तचित्ता सर्वजनोपहास्तामुपयान्ति। न मानयन्ति मान्यान्, जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धोपदेशम्।

**अथवा**

(ख) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषया सरलार्थं कार्यम् – 4

(क) गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च जले च पद्मम्। इन्दुर्द्विलक्षे कुमुदस्य बन्धुर्योयस्य मित्रं न हि तस्य दूरम्।।

**अथवा**

(ख) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।

**5.** अधोलिखितासु सूक्तिषु मात्र ***द्वयोः*** सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – 2 × 2 = 4

(क) यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति।

(ख) अमङ्गलमिव उपघ्नन्ति विश्वासम्।

(ग) कुत्रचित् सोऽयं 'किन्तु' नितान्तमनुतापं जनयति।

(घ) माभूत्परीवादनवावतारः।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तानानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

एवं चतुर्णां परस्परं विवादो लग्नः। ततो ब्राह्मणो राजसमीपमागत्य चतुर्णां विवादवृत्तान्तमकथयत्। राजापि तच्छ्रुत्वा तस्मै ब्राह्मणाय चत्वार्यपि रत्नानि ददौ।

*प्रश्नाः* - 2 × 1 = 2

(क) केषां विवादो लग्नः ?

(ख) रत्नानि कः ददौ ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।।

*प्रश्नाः* - 2 × 1 = 2

(क) अपण्डितानां विभूषणं किम् ?

(ख) 'विधात्रा' - इति पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत - 2 × 1 = 2

(क) निपुणं निरुध्यमाणः लवः मुखचन्द्रेण <u>सीतया</u> संवदत्येव ?

(ख) नाशयति च पुरुषमत्यासङ्गो <u>विषयेषु</u> ?

**खण्डः 'घ'**

## (संस्कृत-साहित्य-परिचयः)

**9.** श्रीभट्टमथुरानाथ शास्त्रिणः ***अथवा*** श्रीदाराशिकोहस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः - 4

(i) शिवराजविजयः,

(ii) समुद्रसङ्गमः।

**खण्डः 'ङ'**

## (छन्दोऽलङ्कार-परिचयः)

**11.** अधोनिर्दिष्टछन्दस्सु मात्र***द्वयोः*** संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(i) शार्दूलविक्रीडितम्,

(ii) वंशस्थः,

(iii) मन्दाक्रान्ता।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8

(i) उपमा,

(ii) व्याजस्तुतिः,

(iii) यमकः।

## खण्डः 'च'

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) अयादिसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) करणकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) बहुव्रीहिसमासस्य ***अथवा*** द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः 'छ'

## [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखितोत्तर-विकल्पेषु ***शुद्धविकल्पं*** चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'तद्धावतः' इति पदे कः सन्धिविच्छेदः ?

(i) तद्धा + अतः (ii) तद् + वतः

(iii) तद् + धातः (iv) तत् + धावतः

(ख) 'हि + एवम्' इति पदे किं सन्धिपदम् ?

(i) हिवम् (ii) हेवम्

(iii) ह्येवम् (iv) हावयम्

(ग) 'पुनरपि' इति पदे कः सन्धिः ?

(i) दीर्घसन्धिः (ii) विसर्गसन्धिः

(iii) गुणसन्धिः (iv) वृद्धिसन्धिः

(घ) 'रत्नाकरः' इति पदे विग्रहोऽस्ति –

(i) रत्नं आकरः (ii) रत्ने आकरः

(iii) रत्नाय इदं (iv) रत्नानाम् आकरः

(ङ) 'अनेजत्' इति पदे कः समासः ?

(i) बहुव्रीहिः (ii) नञ् तत्पुरुषः

(iii) सप्तमी तत्पुरुषः (iv) तृतीया तत्पुरुषः

(च) 'दुर्बला आशा यस्य सः' इति विग्रहे किं समस्तपदम् ?

(i) दुर्बलाशः (ii) दुर्बलाशा

(iii) दुर्बलः आशः (iv) दुर्बला च आशा च

(छ) 'नाम' द्वितीया विभक्तिः बहुवचने रूपम् –

(i) नामनि (ii) नामानि

(iii) नामे (iv) नामभ्यः

(ज) 'कर्मणा' इति पदे का विभक्तिः ?

(i) सप्तमी (ii) द्वितीया

(iii) तृतीया (iv) प्रथमा

(झ) 'रोचन्ते' इति पदे कः धातुः ?

(i) रोच् (ii) रुच्

(iii) रौच् (iv) रच्

(ञ) 'प्राप्नोमि' इति पदे कः पुरुषः ?

(i) अन्यपुरुषः (ii) मध्यमपुरुषः

(iii) उत्तमपुरुषः (iv) प्रथमपुरुषः

(ट) 'जेतव्यः' इति पदे कः प्रत्ययः ?

(i) तव्यत् (ii) तुमुन्

(iii) क्त्वा (iv) क्तवतु

(ठ) 'नि + शम् + ल्यप्' एषां संयोगे किं रूपम् ?

(i) निशमयः (ii) निशम्य

(iii) निशामय (iv) निशमयप

(ड) 'सर्वतः' इति उपपदयोगे का विभक्तिः ?

(i) सप्तमी (ii) प्रथमा

(iii) द्वितीया (iv) तृतीया

(ढ) 'दुष्कृतम्' इति पदस्य समानार्थकपदमस्ति –

(i) मानुषम् (ii) अग्रजम्

(iii) पातकम् (iv) जीवनम्

(ण) 'सचेतसम्' इति पदस्य विशेष्यम् –

(i) विद्वांसम् (ii) भारत

(iii) शास्त्रम् (iv) वार्तालापम्

(त) 'तिष्ठत्' इति पदस्य विलोमपदमस्ति –

(i) धावत् (ii) सूचना

(iii) निशम्य (iv) सकृत